This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-554

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M554 विषय शोर्य.
नांव नृसिंहसप्तराज MSS
लेखक/लिपीकार —
पृष्ठ 7
काळ — पूर्ण/~~अपूर्ण~~

Checked 2012

M-554

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ नृसिंह स्तवराज प्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीलक्ष्मीनृसिंहगुरवेन
मः॥हरिः ॐ॥अस्यश्रीनृसिंहस्तवराजस्तोत्र
१ मंत्रस्य॥महेश्वर ऋषिः॥अनुष्टुप्छंदः॥श्रील
क्ष्मीनृसिंहोदेवता॥मम सर्वाभीष्टसिध्यर्थेजपे
विनियोगः॥ॐकारममृतंब्रह्मनृसिंहमक्षरं
परं॥सद्रूपंपरमंज्ञेयंतंनमामिहरिंपरं॥१॥
उग्रमूर्त्तिंमहामूर्त्तिंज्ञानगम्यंनिरंजनं॥अका
राद्यक्षराःसर्वेतंदेवंप्रणमाम्यहं॥२॥लोकत्रियंलो

१

कगुरुंलोकेशंपरमंपदं सकलंनिष्कलंनि
त्यंनित्यानित्यंनमाम्यहं ३ ज्वालाकरालमस्युग्रं
मृगवक्त्रमनामयं स्वरूपंश्रीसमायुक्तंयोगग
म्यंनमाम्यहं ४ परंज्योतिःपरंधामपरमानं
दविग्रहं शुक्तिकर्णंपरंध्येयंतंनमामिहरिंप
रं ५ ईश्वरउवाच ममात्माघ्राणशक्तिस्त्वंम
लियंमधुरूपरं॥ममानंदकरंश्रेष्ठंनारसिंहंन
माम्यहं॥६॥पितात्वंचसखाभ्रातामातानेतागु
रुःसखा सुहृदश्चात्मरूपस्त्वंत्वांविनानास्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेसुखं ७ वायुरग्निः कलाकाष्ठापर्वतारण्य
रूपधृक् ८ पशवस्तरवः सर्वेविग्रहोन्योधतस्त्व
या ८ दैत्यदानवनाशायविग्रहोधतउच्यते
हिरण्यकशिपुर्दैत्योबलवीर्यमदोत्कटः ९
तस्यनाशयतेरूपंधतंचोग्रंपरंमहत् भवान्
रूपधरःश्रेष्ठनरसिंहमतिविग्रहं १० नेत्रेस्थि
तस्तेदावाग्निर्दैत्यानांभयकारणं श्रीनरसिं
हंमहावीरंदैत्यदानवमर्दनं ११ योगेशंयोग
पुरुषंलोकेशंयोगदायकं सदायोगीहृदिस्था

नंसेवितंचविराजितं १२ कोटिसूर्यप्रतीकाशंख
रूपेणविशेषतः कोटिकंदर्पलावण्यंविग्रहंवीरसिं
हकं १३ देवाधिदेवंसर्वज्ञंसर्वलोकहितेरतं शूरं
शूरप्रतीकारंमहाकालाग्निमर्दनं १४ ज्योतिरूपं
निराभासंनिरंतंकंनिरामयं स्वरूपंसगुणंशां
तंपरेशंपरतःपरं १५ नागयज्ञोपवीतंचकैव
ल्यंमोक्षदायकं ज्ञानानंदप्रतीकाशंज्ञानमार्गंच
शाश्वतं १६ नित्यानित्यंसदासौख्यमानंदमतिसुं
दरं शंखघ्नमखिलंतेजोविग्रहंमत्स्यरूपिणं १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूधरं कूर्मदेहं तं हिरण्याक्षविमर्दनं॥ वाराहव्रती
मंचोग्रनृसिंहदिव्यतेजसं १८ जान्हवीहृदिसं
भूतंवामनंबलिमर्दनं॥ जमदग्निसुतंवीरंचाप
मार्गणधारिणं॥१९ ईशमीड्यंमहातेजंपरश्वायु
धधारिणं पितृवाक्पालितंशूरंशाश्वतंचिरमा
युषं २० कौसल्यागर्भसंभूतंपरमानंदविग्रहं
कोमलांगंपरंश्रेष्ठंजानकीवल्लभंविभुं २१ श्रें ३
खलास्त्रोटिताःसर्वादेवान्सर्वान्सुखंददौ परं
तीर्थंपरंजाप्यंममात्मानंदचेतसं २२ सर्ववे

दार्थसामर्थ्यकेवलंतत्वरूपिणं शिवध्यानपरंम
त्रंवीरासनपरंतपं २३ विश्वामित्रमुनेःसंयज्ञ
मयंचनिरंजनं करुणासागरंदेवंकाकुत्स्थंजा
नकीप्रियं २४ यज्ञरूपंनिराभासंसत्यसंधंजि
तारिणं तंनमामिपरंमंत्रंरामकुंछंजगन्मयं २५
चतुर्भुजंरमायुक्तंदेवक्यातनुजंविभुं पीतकौशे
यवसनंमेघश्यामंजनार्दनं २६ श्रीवत्सधारिणं
देवंकंसासुरविघातकं॥ सहस्रफणिशेषेणनि
त्यंस्तुत्यादिसेवितं॥२७॥ श्रीधरंश्रीकरंश्रीशंश्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीनृसिंहोनरैस्तुत्योगंधर्वैःकिन्नरैर्वरैः ॥४
निवासंजगद्गुरुं ॥ बुद्धोबुद्धप्रियोबुद्धैर्बोधकोबु
द्धिवंदितः ॥२८॥ कल्किसृजत्कल्किरूपोकरुणा
करवत्सलः ॥ श्रीनृसिंहोमहावीरोदुष्टदानवमर्द
नः ॥२९॥ ॐ क्ष्रौंश्रीनृसिंहदिव्यतेजकोटिसूर्य
प्रतीकाशसर्वदुष्टान्नाशयनाशयदारय२मारय२ ॥ ४
तापय२दीपय२विदारय२स्तंभय२मोहय२रा
पय२स्फोटयस्त्रोटय२नाशय२शोषय२त्रा
य२हुं ११ क्रौं३श्रीं५सौं३क्ष्रौं३टं२ठं४फं४ह्रीं३
क्रीं३श्रीनृसिंहशीघ्रंएहिएहिमम रक्षरक्षशत्रू

नाशय२व्यालव्याघ्रसिंहसर्पशार्दुलान्नाशयना
शयसर्वदुष्टदुर्जनशत्रुभयंनाशयनाशयमम
रक्षरक्षस्वाहा ॥ आयुतंयोजपेत्पूर्वंहोतव्यंस
र्पिषातथा ॥ तत्तत्सिद्धिर्भवेत्तस्यसाधकस्यन
संशयः ॥३०॥ ॐनृसिंहःकेशवःशौरिर्गोविंदो
गरुडध्वजः ॥ माधवश्चक्रपाणिश्चविष्वक्सेनो
तः३ नीहलायुधः ॥३१॥ शार्ङ्गीशंकरःशूलीहयग्रीवोच्यु
ताग्रजः ॥ उमरुःशूलहस्तश्चनागाभरणभू
षितः ॥३२॥ कृपयानंदसंपूर्णोवृषांकोवृषभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥

ध्वजः॥ नारायणः परं ज्योतिः सुज्योतिर्ज्यो
तिषां पतिः॥३३॥ स्वाहाकारः स्वधाकारो वषट्
कारः कृपाकरः॥ नररूपोथ सिंहश्च षोडशा
युधधारणः॥३४॥ शुक्तिकर्णो विरूपाक्षो नखा
युधविभूषणः॥ दंष्ट्राकरालमत्युग्रः श्रीशः श्री
धरशाश्वतः॥३५॥ नीलोनिलः सरोग्निश्च शू
न्यमाकाशभूधृक्॥ त्वं ज्योतिर्ब्रह्म इंद्रश्च वि
च्छुरीशः परो गुरुः॥३६॥ इत्येतैर्नामभिः स्तोत्रं
जपेन्नित्यं प्रयत्नतः॥ एकांते निर्जने देशे शु

त

५

चौस्थाने मनोहरे॥३७॥ मंडलं कारयेत्तत्र पूजयेन्न
हरिं गुरुं॥ स्तवराजं जपेत्तत्र पूजा नानाविधाः शु
भाः॥३८॥ स्तवराजं जपेन्नित्यं भावयुक्तं सुधीम
ता॥ अस्मिन्जगत्त्रये तस्य नासाध्यं न च दुष्करं
३९॥ य इदं मंत्रराजं तु सर्वसिद्धिप्रदं नृणां॥ रा
त्रौ यः सप्तवाराणि श्मशाने मुक्तकेशिना॥४०॥ अ
श्वत्थोपरि संगम्य दक्षिणाभिमुखो भवेत्॥ सरि
पून्नाशयेच्छीघ्रं निशि तत्र न संशयः॥४१॥ स्थि
त्वा पूर्वमुखः स्वस्थो विंशत्यावर्त्तनं चरेत्॥ पूर्वोक्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नविधानेनश्रीघ्रंरिपुविनाशनं ४२ त्रिरावर्त्त
नंगेहे सप्तकं त्रीणि संख्यया भावयुक्तोजितेंद्र
श्वश्रूमिश्रा यीहविष्यभुक् ४३ समंत्रजपसि
ध्यर्थं प्रत्यक्षोन्नरहरिस्तदा आयुतंयोजपेत्स्व
र्वसमंत्रःसिद्धिदायकः ४४ लक्ष्मीस्तस्यप्रस
न्नाचसदातिष्ठतितद्गृहे रिपुणांकुलनाशाय
जपेद्वयुतसंख्यया ४५ अंगुलिद्वयकीलंतु
तुलसीमूलकाष्ठजं निःक्षिप्तंयस्यगेहेतुपुत्र
स्तस्यभविष्यति ४६ यइदंस्तवराजंतुनृसिं

हसिद्धिदायकं शिवेनकथितंसारंपार्वत्यग्रेवि
शेषतः ४७ योजपेच्छृणुयाद्वापिभावयुक्तःसु
धीमता ससाम्राज्यमवाप्नोतिसत्यंजानिहिपा
र्वति ४८ शौर्यंवीर्यंबलंतेजःपुत्रंपौत्रंचरंग
श्चतं सर्वभोगानुमान्नरश्रीघ्रंनृसिंहस्यप्रसाद
तः। ४९ यइदंजपतेनित्यमिहलोकेपरंसुखं
अंतेप्रयातिमोक्षंचशिवस्यवचनंतथा ५० इं
तिश्रीपरमगुह्यसारेशिवपार्वतीसंवादेनृसिंह
स्तवराजस्तोत्रंसंपूर्णं॥श्रीनृसिंहार्पणमस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ७॥

इति नरसिंहसवराजसमाप्तः॥

॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.09.19 11:00
,TRANSFERRED=2019/09/05 at 11:03:14
,PAGES=9
,TYPE=STD
,NAME=S0001647
,Book Name=M-554-NIRSINGH STWARAJ
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection